# Muttusvami Dikshita Ashtottarashatanamavalih

# मुत्तुस्वामि-दीक्षित-अष्टोत्तरशतनामावलिः

## Document Information

Text title : Muttusvami Dikshita Ashtottarashata Nama Stotram

File name : muttusvAmidIkShitanAmAvalI.itx

Category : deities_misc, gurudev, aShTottarashatanAmAvalI

Location : doc_deities_misc

Author : Rajani Arjun Shankar rajani_arjun at yahoo.com

Transliterated by : Rajani Arjun Shankar

Proofread by : Rajani Arjun Shankar

Description/comments : See corresponding stotram. Composed on the occasion of Shri Muthusvami Dikshitar's 250th birth anniversary (jayanthI)

Latest update : April 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 2, 2025

*sanskritdocuments.org*

# मुत्तुस्वामि-दीक्षित-अष्टोत्तरशतनामावलिः

ॐ कमलालय-सञ्जाताय नमः ।
ॐ रामस्वामि-कुलोद्वहाय नमः ।
ॐ बालाम्बिका-कृपाप्राप्ताय नमः ।
ॐ सुब्बम्मानन्द-वर्धनाय नमः ।
ॐ श्रुतिस्मृति-पुराणेतिहास-साहित्य-पारगाय नमः ।
ॐ स्वपित्रार्जित-सङ्गीत-शास्त्रज्ञानाय नमः ।
ॐ महामतये नमः ।
ॐ गृहागत-गुरुश्रेष्ठाय नमः ।
ॐ विनीताय नमः ।
ॐ देशिकानुगाय नमः । १०
ॐ शमदमादि-सम्पन्नाय नमः ।
ॐ सर्वशास्त्र-विशारदाय नमः ।
ॐ कृतवाराणसी-वासाय नमः ।
ॐ श्रीविद्या-सम्प्रदायकाय नमः ।
ॐ भागीरथी-कराल्लब्ध-वीणालङ्कृत-हस्तकाय नमः ।
ॐ योगशास्त्र-विशेषज्ञाय नमः ।
ॐ विधूत-कलिकल्मषाय । नमः ।
ॐ श्रीचिदानन्द-नाथाख्याय नमः ।
ॐ भस्म-रुद्राक्ष-भूषिताय नमः ।
ॐ पूर्णाचल-गुहप्राप्त-मिष्टाय नमः । २०
ॐ गेयकृदुत्तमाय नमः ।
ॐ विभक्तिक्रम-सम्पूर्ण- श्रीगुरुगुह-वैभवाय नमः ।
ॐ काञ्चीपुरे गीतरत्नैः विभूषित-मणित्रयाय नमः ।
ॐ कालहस्ति-ज्ञानवल्ली-प्राणेशार्पित-गायनाय नमः ।
ॐ अभ्रसभेश-सद्भक्ताय नमः ।

ॐ अरुणाचल-चिन्तकाय नमः ।
ॐ त्यागेशार्पित-सर्वस्वाय नमः ।
ॐ रमापुर-कृतालयाय नमः ।
ॐ सुन्दरमूर्तिनादिष्ट-भक्तियोग-पथे स्थिताय नमः ।
ॐ कमलाम्बा-कटाक्षेण ब्रह्मानन्दे सुनिष्ठिताय नमः । ३०
ॐ जितेन्द्रियाय नमः ।
ॐ सदातृप्ताय नमः ।
ॐ त्यक्त-हीन-नराश्रयाय नमः ।
ॐ वाणी-संरक्षिताय नमः ।
ॐ लक्ष्मी-बहुमानित-जीविताय नमः ।
ॐ हैयङ्गवीन-हृदयाय नमः ।
ॐ सर्वभूतहिते रताय नमः ।
ॐ तेजस्विने नमः ।
ॐ वैराग्य-चूडामणये नमः ।
ॐ यशस्विने नमः । ४०
ॐ वरिवस्या-रहस्यज्ञाय नमः ।
ॐ तन्त्रशास्त्रेषु कोविदाय नमः ।
ॐ मन्त्रशास्त्र-सुधाम्भोधि-मथनोद्भव-गेयकाय नमः ।
ॐ गीत-नर्तन-तालज्ञ-शिष्य-बृन्द-सुशोभिताय नमः ।
ॐ शान्ताय नमः ।
ॐ दान्ताय नमः ।
ॐ स्थितप्रज्ञाय नमः ।
ॐ भूपालैरभिनन्दिताय नमः ।
ॐ कामक्रोधादि-संरम्भ-रहिताय नमः ।
ॐ गतमायिकाय नमः । ५०
ॐ चाञ्चल्यरहिताय नमः ।
ॐ धीराय नमः ।
ॐ वासनात्रय-वर्जिताय नमः ।
ॐ स्वस्वरूपानुसन्धान-भक्ति-पूरित-वाचकाय नमः ।
ॐ चिद्रूपात्मकदेवस्य मनने कृतनिश्चयाय नमः ।
ॐ जपमालाधराय नमः ।
ॐ नित्य-तपश्चर्या-दृढव्रताय नमः ।

ॐ शङ्करार्य-मताचाराय नमः ।
ॐ षण्मतेषु कृतादराय नमः ।
ॐ शिवशक्ति-हरिस्कन्द-गणेशादि-प्रपूजकाय नमः । ६०
ॐ भास्करादि-ग्रहोत्तंसोपासना-मार्गदर्शकाय नमः ।
ॐ क्षेत्र-तीर्थ-प्रभावज्ञाय नमः ।
ॐ क्षेत्र-दर्शन-तत्पराय नमः ।
ॐ माधुर्य-सुषमा-युक्त-स्थल-कीर्तन-गायकाय नमः ।
ॐ अक्षयेश-पुरो गानात् अपावृत-कवाटकाय नमः ।
ॐ कावेरी-तीर-सञ्चार-पूत-चोल-प्रदेशकाय नमः ।
ॐ नायकीयुत-रङ्गेश-मातृभूत-प्रशंसकाय नमः ।
ॐ अखिलाण्डेश्वरी-नाथ-जम्बूपति-सुकीर्तनाय नमः ।
ॐ अभिरामी-मनोहारि-शङ्खाभिषेक-दर्शनाय नमः ।
ॐ मध्यार्जुन-महालिङ्ग-महिमोत्कर्ष-घोषणाय नमः । ७०
ॐ स्मेरास्य-चम्पकारण्य-कृष्ण-लावण्य-मोहिताय नमः ।
ॐ कृष्णमङ्गल-नामादि-दिव्यदेशाटन-प्रियाय नमः ।
ॐ गोकर्ण-गर्ततीरादि-समीपस्थल-गामिने नमः ।
ॐ द्विसप्त-भुवन-प्रख्य-रागमाला-विधायकाय नमः ।
ॐ परिपूजित-मायूराय नमः ।
ॐ कुम्भघोणेश-वन्दनाय नमः ।
ॐ अद्वैत-ज्ञान-सम्पूर्णाय नमः ।
ॐ अज्ञानार्ति-चिकित्सकाय नमः ।
ॐ गान्धर्व-विद्यया लोक-समुद्धरण-पण्डिताय नमः ।
ॐ नादोपासन-संसक्ताय नमः । ८०
ॐ नादामृत-सुपानकाय नमः ।
ॐ वीणावादन-तत्त्वज्ञाय नमः ।
ॐ वैणिक-गायकोत्तमाय नमः ।
ॐ युक्त-गमक-संशोभि-गान-वर्षण-वारिदाय नमः ।
ॐ वेङ्कटमखि-वंश्यात्त-रागाङ्गराग-पद्धतये नमः ।
ॐ द्विसप्तति-रागरत्न-भूषिताखिल-दैवताय नमः ।
ॐ औत्तर-रागरीतिज्ञाय नमः ।
ॐ सप्तताल-प्रयोजकाय नमः ।
ॐ यमक-प्रास-यत्यादि-प्रसाधित-स्ववाङ्-मयाय नमः ।

ॐ रागमुद्राति-वैचित्र्य-विस्मापित-सहृज्जनाय नमः । ९०
ॐ राग-स्वरूप-विस्तार-विद्वज्जन-मनोहराय नमः ।
ॐ गज-गमन-गम्भीर-विलम्बगति-दर्शकाय नमः ।
ॐ पाश्चात्यगीत-साहित्य- नूत्नगान -सुकल्पिताय नमः ।
ॐ जीवन्मुक्ताय नमः ।
ॐ जितामर्षाय नमः ।
ॐ सामरस्य-परायणाय नमः ।
ॐ कृपा-कटाक्ष-सम्पात-मोक्षमार्ग-प्रकाशनाय नमः ।
ॐ मीननेत्रानुकारेण दिग्विजय-प्रतापिने नमः ।
ॐ सौलभ्यादि-गुणग्राम-दासभूत-जगत्त्रयाय नमः ।
ॐ काञ्ची-यतीश्वराख्यात-सुब्रह्मण्य-सुकीर्तनाय नमः । १००
ॐ अमृतेशी-प्रसादेन कारितामृत-वर्षणाय नमः ।
ॐ कङ्कशैल-विहारश्री-स्कन्ददर्शन-हर्षिताय नमः ।
ॐ काश्मीर-शारदारम्भ-सेतु-पर्यन्त-भावनाय नमः ।
ॐ पाशमोचन-मीनाक्षी-पूर्णानुग्रह-भाजनाय नमः ।
ॐ दीपावली-दिन-प्राप्त-कैवल्यपदाय नमः ।
ॐ उज्ज्वलाय नमः ।
ॐ लोकगुरवे नमः ।
ॐ मुत्तुस्वामि-दीक्षित-सद्गुरवे नमः । १०८

इति श्रीमुत्तुस्वामि-दीक्षित-अष्टोत्तरशतनामावलिः समाप्ता ।

Note:

Muthusvami Dikshitar is one of the revered Trinity of Carnatic Music composers. Following the path of Sri Adi Shankaracharya, he has composed songs in praise of various gods, as manifestations of the same Parabrahmam. His Keertanas are entirely in Sanskrit (except 2-3 songs which are in Manipravala style) , and are infused with concepts of Advaita Vedanta and Srividya Upasana. His works provide guidance and joy to thousands of devotees and music-lovers.

Composed on the occasion of Shri Muthusvami Dikshitar's 250th birth anniversary (jayanthI) and encoded/proofread by Rajani Arjun Shankar

*Muttusvami Dikshita Ashtottarashatanamavalih*

pdf was typeset on April 2, 2025

Please send corrections to *sanskrit@cheerful.com*